CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 340

Title Savitri Vrata.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 340. Subject : Pauranic Ritual

Title : Sāvitrī Vrata

Author : Rāmadeva Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 10.5" by 4.6" Extent : 3 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks : —

ब्रंलासाविश्रीनीथक्कापत्र२

॥श्रीगणेशाय नमः॥ युधिष्ठिर उवाच॥ स्मारयामि हृषीकेश यथोक्तं भवता कथितं॥ तत् सावित्र्या व्रतं ब्रूहि दयां कृत्वा ममोपरि॥१॥ श्रीकृष्ण उवाच॥ कथयामि कुरुश्रेष्ठ
यत्नेनाग्र्यं युधिष्ठिर॥ यथा चीर्णं तु सावित्र्या अरण्ये राजकन्यका॥२॥ आसीन्मद्रेषु धर्मात्मा सर्वभूतहिते रतः॥ पार्थिवोऽश्वपतिर्नाम पौरजानपदप्रियः॥३॥
क्षमावान् अनपत्यश्च सत्यवाक् संजितेंद्रियः॥ स तु अपत्यव्रतं सम्यक् चचार व्रतमुत्तमं॥४॥ सावित्री तिथिसंसिद्धं यत् सर्वकामप्रदायकं॥ तस्य तुष्टा भवत् प्राज्ञस्य सावि
त्री कमलप्रिया॥५॥ सानुभूय स्वर्गं इत्येवं साक्षात् अन्तर्हिता मता॥ स्थिता कमंडलु धरा देवी प्रसन्नवदने लोचनाः॥६॥ उवाच दुहिता ते कालेन वरानने भविष्यति इत्येवमु
क्त्वा सावित्री जगाम अदर्शनं पुनः॥७॥ कालेन दुहिता जाता बालकानां देवरूपिणी॥ सावित्र्या प्रीतया दत्ता सावित्र्याजन्यया तथा॥८॥ सावित्री तेन नाम्ना स्यात् वृद्धिं
च व्रतया पिता॥ सावित्री सुकुमारांगी यौवनस्था बभूव ह॥९॥ तां सुमध्यां पृथुश्रोणीं प्रतिमां कांचनीमिव॥ प्राप्तेयं देवकन्येति दृष्ट्वा तां मेनिरे जनाः॥१०॥
सा तु पद्मपलाशाक्षी प्रज्वलंतीव तेजसा॥ व्रतचार सा पितुः सावित्री व्रतं यत् पुण्यदितं॥११॥ अथोपोष्य शिरःस्नाता देवतामभिगम्य च॥ हुत्वाग्निं विधिव
द्विप्रान् वाचयित्वा च पर्वणि॥१२॥ तेभ्यः सुमनसः शेषाः प्रतिगृह्य नृपात्मजा॥ सखीपरिवृता ऽभ्येत्य देवी श्रीरिव रूपिणी॥१३॥ साभिवाद्य पितुः पादौ शेषाः
पूर्वं निवेद्य चाप तां सा शिवरारोहन् नृपतेः पुरतः स्थिता॥१४॥ तां दृष्ट्वा यौवनप्राप्तां स्वां सुतां देवरूपिणीं॥ उवाच राजा मात्यैः सह मंत्रिभिः सह भार्यया॥१५॥
पुत्रिप्रदानकालोऽस्ति न च कश्चिद् वृणोति च॥ विचारयन् न पश्यामि वरं तुल्यमिहात्मनः॥१६॥ देवानां च यथा वाच्यो न भवेयं तथा कुरु॥ पठ्यमानं मया
पुत्री धर्मशास्त्रेषु च श्रुतं॥१७॥ पितुर्नेह या कन्या रजः पश्यत्य संस्कृता॥ नूनं हत्या पितुः तस्य सा कन्या वृषली स्मृता॥१८॥ अतोऽहं प्रेषयामि त्वां कुरु पु
त्रि स्वयंवरं॥ वृद्धैरमात्यैः सहिता शीघ्रं गच्छ विचारय ह॥१९॥ एवमस्त्विति सावित्री प्रोक्ता तस्माद्विनिर्ययौ॥ तपोवनानि रम्याणि राजर्षीणां जगाम सा॥
२०॥ मान्यानां तत्र वृद्धानां कृत्वा पादाभिवंदनं॥ ततो विगम्य तीर्थानि समवाप्य वासमाश्रमं गता॥२१॥ आजगाम पुनर्वेश्म सावित्री सह मंत्रिभिः॥ तत्रापश्य
त देवर्षिं नारदं पुरतः पितुः॥२२॥ आसीनमासने दिव्ये प्रणम्य स्मितभाषिणी॥ कथयामास तत्कार्यं येनारण्ये गता गता॥२३॥ सावित्र्युवाच॥ आसीत् शाल्वे
षु धर्मात्मा क्षत्रियः पृथिवीपतिः॥ द्युमत्सेन इति ख्यातो दैवादंधो बभूव सः॥२४॥ अथ स्य बालपुत्रस्य द्युमत्सेनस्य रुक्मिणा॥ सामंतेन हृतं राज्यं
छिद्रेऽस्मिन् पूर्ववैरिणा॥२५॥ स बालवत्सेन सार्धं भार्यया प्रस्थितो वनं॥ मनस्य वनमध्ये वृद्धपुत्रः परमधार्मिकः॥२६॥ सत्यवान् अनुरूपो मे भर्तेति
मनसा वृता॥ नारद उवाच॥ अहो बत महत्कष्टं सावित्र्या नृपते कृतं॥२७॥ बाल्याद्भावाद्य दनयो गुणवान् सत्यवान् इति॥ सत्यं वक्ति पिता ह्यस्य सत्यमा

ता प्रभाषते॥२८॥ सत्यं वक्तीति मुनिभिः सत्यवान् नाम वै कृतं॥ नित्यमश्वाः प्रियास्तस्य करोत्यश्वांश्च मृन्मयान्॥ चित्रेऽपि विलिखेत्यश्वान् चित्राश्व इति चो
च्यते॥२९॥ स पुत्रो रंतिदेवस्य राज्ञो दानगुणे समः॥ ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा॥३०॥ ययातिरिव चोदारः सोमवत् प्रियदर्शनः॥ रू
पे दार्यः समो ह्यश्विभ्यां द्युमत्सेनसुतो बली॥३१॥ एको दोषोऽस्ति नान्योऽस्य अद्यप्रभृति सत्यवान्॥ संवत्सरेण क्षीणायुर्देहत्यागं करिष्यति॥३२॥ ना
रदस्य वचः श्रुत्वा तनयां प्राह पार्थिवः॥ पुत्रि सावित्रि गच्छ त्वमन्यं याचस्व सत्पतिं॥३३॥ संवत्सरेण सोऽल्पायुर्देहत्यागं करिष्यति॥ सावि
त्र्युवाच॥ सकृज्जल्पंति राजानः सकृज्जल्पंति पंडिताः॥३४॥ सकृत् कन्याः प्रदीयंते त्रीण्येतानि सकृत् सकृत्॥ दीर्घायुरथवाल्पायुः सगुणो नि
र्गुणोऽपि वा॥३५॥ सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहं॥३६॥ मनसा निश्चयं कृत्वा ततो वाचाभिधीयते॥ क्रियते कर्मणा पश्चात् प्रमाणं मे म
नस्ततः॥३७॥ नारद उवाच॥ एतदिष्टं दुहितुस्ते ततः शीघ्रं विधीयतां॥ अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव॥३८॥ एवमुक्त्वा समुत्पत्य ना
रदस्त्रिदिवं ययौ॥ राजा च दुहितुः सर्वं विवाहं कृतवान् ततः॥३९॥ प्रमेयं पुत्रे पार्श्वस्थैः ब्राह्मणैर्वेदपारगैः॥ सावित्र्यपि वरं लब्ध्वा तस्मिन्नेव स्थिता॥४०॥ मुमु
दे तीव तत्संगी स्वर्गं प्राप्येव पुण्यकृत्॥ एवं तत्राश्रमे तेषां सदा निवसतां सतां॥४१॥ कालः कश्चित् व्यतीतः स्थितिः संप्रतिक्रांतश्च भारत॥ सावित्र्याश्च शयाना
याः तिष्ठंत्याश्च दिवानिशं॥४२॥ नारदेन यदुक्तं तद् वाक्यं मनसि वर्तते॥ ततः काले न कतिचित् व्यतिक्रांते कदाचन॥४३॥ प्राप्तः कालो म्रियतव्यो यत्र
२६ सत्यवान् नृपा ज्येष्ठमासे सिते पक्षे द्वादश्यां रजनीमुखे॥४४॥ गणयंत्याश्च सावित्र्या नारदोक्तं वचो हृदि॥ चतुर्थेऽह्नि मर्तव्यमिति संचिंत्य भामिनि॥४५॥
व्रतं त्रिरात्रमुद्दिश्य दिवारात्रिं स्थिता भवेत्॥ ततः त्रिरात्रिं निर्वर्त्य स्नात्वा संतर्प्य देवता॥४६॥ श्वश्रूश्वशुरयोः पादौ ववंदे चारुहासिनी॥ अथ प्रतस्थे
परशुं गृहीत्वा सत्यवान् नृपा॥४७॥ सावित्र्यपि च भर्तारं गच्छंतं पृष्ठतोऽन्वगात्॥ ततो गृहीत्वा भारं सा फलपुष्पसमित्कुशान्॥४८॥ तथा कुसुमानि काष्ठानि गृहीत्वा
गृहीत्वा भारकं सुतः॥ अथो पाटयतः काष्ठं जाता शिरसि वेदना॥४९॥ काष्ठभारं ततः कृत्वा वटशाखावलंबिनीं॥ सावित्रीं प्राह शिरसो वेदना मां प्रबा
धते॥ प्रताप्य तवोत्संगे क्षणं स्थास्यते च स्वप्तुमिच्छामि सुंदरि॥ विश्रमस्व महाबाहो सावित्री प्राह दुःखिता॥५१॥ पश्चादपि गमिष्यामि स्वाश्रमं श्रमनाशनं॥ या
वदुत्संगतः कृत्वा शिरस्त्वस्ते महीतले॥ तावद्ददर्श पुरुषं सावित्री कृष्णपिंगलं कांतिकिरीटिनं पीतवस्त्रं साक्षात् सूर्यमिवोदितं॥५२॥ तमुवाचाथ सावित्री

न्यमधुराक्षरं। कस्त्वं देवोथवा दैत्यो मां धर्षयितुमागतः।५४। न च मां शक्नुयात्कश्चित्स्वधर्माद्विरोधितुं। दृष्ट्वा पुरुषश्रेष्ठ दीप्तामग्निशिखामिव।
५५। यम उवाच। यमः संयमनश्चास्मि सर्वलोकभयंकरः। क्षीणायुरेष ते भर्त्ता त्वं सन्निधौ ते पतिव्रते।५६। न शक्यः किंकरैर्नेतुं अतोहं स्वयमागतः। एवमुक्त्वा
सत्यवतः शरीरात्पाशसंयुतं।५७। अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्। अथ प्रयातुं मारेभे पंथानं पितृसेवितं।५८। सावित्र्यपि वरारोहा दृष्ट्वा
तोनुजगाम तं। पतिव्रतात्वाद्द्‌श्रांतां तामुवाच यमस्तदा।५९। निवर्त्त गच्छ सावित्रि सुदूरं त्वमिहागता। एष मार्गो विशालाक्षि न केनाप्यनुगम्यते। सावि
त्र्युवाच।६०। न श्रमो न च मे ग्लानिः कदाचिदपि जायते। भर्त्तारमनुगच्छंत्या विशिष्टस्य च सन्निधौ।६१। सतां संतो गतिर्नान्या स्त्रीणां भर्त्ता सदा गतिः।
वेदो वर्णाश्रमाणां च शिष्याणां च गुरुर्गतिः।६२। सर्वेषामेव जंतूनां स्थानमस्ति महीतले। भर्त्तारमेकं मुक्त्वा च स्त्रीणां नान्यः समाश्रयः।६३। एवमन्
यैश्च मधुरैर्वाक्यैर्धर्मार्थसंहितैः। तुतोष सूर्यतनयः सावित्रीं चेदमब्रवीत्।६४। तुष्टोस्मि तव भद्रं ते वरान्वरय भामिनी। साथ वव्रे वरान्पंच विने
यावनतानना।६५। चक्षुःप्राप्तिस्तथा राज्यं श्वशुरस्य महात्मनः। पितुः पुत्रशतं चैव पुत्राणां शतमात्मनः।६६। जीवितं च तथा भर्त्तुर्धर्मे बुद्धिश्च शाश्व
ती। धर्मराजो वरान्दत्वा प्रेषयामास तां ततः।६७। अथ तस्मिन्मासि सा सावित्री हृष्टमानसा। जगाम स्वाश्रमपदं सह भर्त्रा निजैराकुला।६८। पू
र्णमास्यां तया चीर्णं व्रतं जन्मनाशनं। माहात्म्यमस्य नृपते कथितं मया।६९। युधिष्ठिर उवाच। कीदृशं तत्कृतं देव सावित्र्या यदनुष्ठितं।
कस्मिन्मासे तिथौ कस्यां को मंत्रः किं फलं विभो।७०। सविस्तरं हृषीकेश ब्रूहि धर्मं सनातनं। कृष्ण उवाच। श्रूयतां पांडवश्रेष्ठ सावित्रीव्रतमा
दरात्। कथयामि यथा चीर्णं तया सत्या युधिष्ठिर।७१। त्रयोदश्यां ज्येष्ठमासे दंतधावनपूर्वकं। त्रिरात्रोद्दिष्टनियमः कार्य उपवासश्च भावतः।
७२। अशक्तस्तु त्रयोदश्यां नक्तं कुर्याज्जितेंद्रियः। अयाचितं चतुर्दश्यामुपवासेन पूर्णिमा।७३। नित्यं स्नात्वा महानद्यां तडागे वाथ निर्झरे। विशेषात्पू २
र्णिमायां तु स्नानं सर्षपमृत्तिकैः।७४। आदाय वालुकां पात्रे प्रस्थमात्रां युधिष्ठिर। अथवा धान्यमादाय यवशालितिलादिकं।७५। ततो वंशमये पात्रे वस्त्रयुग्मे
न वेष्टिते। सावित्रीप्रतिमां सर्वावयवशोभनां।७६। सौवर्णीं मृन्मयीं वापि स्वशक्त्या रूपनिर्मितां। रक्तं वस्त्रयुगं दद्यात्सावित्र्यै ब्रह्मणः सितं।७७।
सावित्रीं ब्रह्मणा सार्द्धमेवं भक्त्या प्रपूजयेत्। गंधैः सुगंधपुष्पैश्च धूपनैवेद्यदीपकैः।७८। रक्तद्रोणातकी पक्वैः कूष्मांडैः कर्कटीफलैः। नालिकेरैः

खर्जूरैः कपित्थैर्दाडिमैः शुभैः।७९। जंबूजंबीरनारंगैरक्षोडैः पनसैस्तथा। विरूढैः सप्तधान्यैश्च वंशपात्रप्रकल्पितं।८०। रजन्यां कंठसूत्रैश्च कुं
मकेसरैः। अवतारं करोत्येषा सावित्री ब्रह्मणः प्रिया।८१। तामर्च्ययंतीमंत्रेण सावित्रीं ब्रह्मणः प्रियां। इतरे चापुराणोक्तैर्मंत्रैर्यसमुदाहृतैः।८२।
ॐकारपूर्विके देवि वीणापुस्तकधारिणि। वेदमातर्नमस्तुभ्यमवैधव्यं प्रयच्छ मे।८३। एवं संपूज्य विधिवज्जागरं तत्र कारयेत्। गीतवादित्रश
ब्देन हृष्टनारीकदंबकं।८४। नृत्येन सन्नयेद्रात्रिं धर्माख्यानकथानकैः। सावित्र्याख्यानकं तत्र वाचयीत द्विजोत्तमः।८५। प्रावस्नातसमयं
गीत्याभावरसैः सह। ततः प्रभाते विमले पाकालेहकपस्थिते।८६। ब्राह्मणे वेदविदुषे सावित्रीं विनिवेदयेत्। अथ सावित्रिकल्पज्ञे सावित्र्या
ख्यानवाचके।८७। दैवज्ञे उंछवृत्तिज्ञे दरिद्रे वाग्निहोत्रिणि। मंत्रेणानेन कौंतेय प्रणम्य विधिपूर्वकं।८८। दर्भासेतितिलोभिश्चा सर्वाशापि सुख
स्थिता। शुचिवस्त्रधरे विप्रे उंकारस्वस्तिपूर्वकं।८९। सावित्री च मया दत्ता सहिरण्या महासती। ब्रह्मणः प्रीणनार्थाय ब्राह्मणे प्रतिगृह्यतां।९०।
एवं दत्वा द्विजेंद्राय सावित्रीं तां युधिष्ठिर। निवेद्यादि चतस्सर्वं ब्राह्मणस्य गृहे नयेत्।९१। स्वयं दश पदं गच्छेत्स्ववेश्मनि पुनर्विशेत्। तत्र भुक्ता
हविष्यान्नं ब्राह्मणैर्बंधुभिः सह।९२। विसर्जयेत्ततो विप्रान्सावित्रीप्रतिमामिति। पंचदश्यां ज्येष्ठमासे वटवृक्षेण मानसी।९३। त्रिरात्रोपोषि
ता नारी विधिनानेन पूजयेत्। सार्द्धं सत्यवता साध्वी फलनैवेद्यदीपकैः।९४। वटावलंबनं कृत्वा काष्ठभारं युधिष्ठिर। रात्रौ जागरणं
कुर्यान्नृत्यगीतपुरःसरं।९५। ततस्तत्र — नेविधिना सर्वोक्तेन नरोत्तमानामपि ब्राह्मणेभ्यो दत्वा स्वाणि पात्य क्षमापयेत्।९६। अनुव्रतं
पीदं ते कथितं विधिवन्मया। याचिरं स्थिति लोकेस्मिन्पुत्रपौत्रसमन्विता।९७। भुक्त्वा भोगांश्चिरं सौख्यं याति ब्रह्मणः पदं। एतत्पुण्यं
पापहरं धन्यं दुःखविनाशनं।९८। जपतां शृण्वतां चैव सावित्रीव्रतमादरात्।९९। स्मृत्यर्थविदज्जननीसहस्रं तु नायासहस्रयेदिति ३
रात्रव्रतोपवासेः सावित्रिव्रतिच कुलं च कुलं च भर्त्तुरुधृत्य मातुः पितुश्च कीर्त्तिरं सुखवान्।१००। इति श्रीभविष्योत्तरे सावित्रीव्रतं समाप्तं।
।श्री।। ।।श्री।। ।।श्री।। ।।ही।रणछोडसुत रामदेवेन लिखितं।। ।।श्रीविश्वेशो जयति।। ।।श्रीरस्तु।। ।।कल्याणमस्तु

4